# shrIraghunandanatIrthastutiH

# શ્રીરઘુનન્દનતીર્થસ્તુતિઃ

## Document Information

Text title : Raghunandanatirtha Stutih

File name : raghunandanatIrthastutiH.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : AnandatIrthasharmA AchArya

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Latest update : June 13, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2020

*sanskritdocuments.org*

# શ્રીરઘુનન્દનતીર્થસ્તુતિઃ

ૐ ।
વિશ્વાનિ દેવ સવિતર્દુરિતાનિ પરા સુવ । યદ્ભદ્રં તન્ન આ સુવ ॥

શ્રીશઃ સર્વોત્તમઃ કૃષ્ણો દણ્ડદામધરો હરિઃ ।
શ્રીમધ્વહૃદયાવાસો રૂપ્યપીઠગતોવતાત્ ॥ ૧॥

જયન્તિ જાનકીજાનેઃ પાદમ્ભોજરજકણાઃ ।
લેભે શિલાપિ યૈઃ સ્પૃષ્ટાવાચં વાક્પતિદુર્લભામ્ ॥ ૨॥

શ્રીભારતપ્રવરયુદ્ધરથોદ્ધતશ્રીઃ
પાર્થૈકકેતનકરાલવિશાલમૂર્તિઃ ।
ઉચ્ચૈર્ઘનાઘનઘટાવિકટાટ્ટહાસઃ
શ્રીકૃષ્ણભક્ષભરણો હનુમાન્ પુનાતુ ॥ ૩॥

શ્રીમધ્વાગમસિદ્ધભવ્યવિભવં સૌભાગ્યભાગ્યોદયં
ગ્રન્થગ્રન્થિવિભેદને પટુતરં માયીભપઞ્ચાનનમ્ ।
વૈરાગ્યાઙ્કુરવર્ધને જલધરં શ્રીમૂલરામાર્ચકં
વન્દે શ્રીરઘુનન્દનં યતિવૃષં મધ્વાધ્વનીનાવનમ્ ॥ ૪॥

આ કુમારં યશો યસ્ય વૈષ્ણવસ્ય મહાત્મનઃ ।
સત્યધર્મરતઃ સોસૌ પાતુ શ્રીરઘુનન્દનઃ ॥ ૫॥

રોગપઙ્કાર્ણવે મગ્નાન્ યઃ સમુદ્ધરતે નરાન્ ।
સોપૂર્વવૈદ્યઃ પુણ્યાત્મા પાતુ શ્રીરઘુનન્દનઃ ॥ ૬॥

ત્રિકોટિરૂપઃ પ્રાણો યો વામનસ્યાર્ચકોભવત્ ।
તન્મુખ્યવાયુસેવોત્કઃ પાતુ શ્રીરઘુનન્દનઃ ॥ ૭॥

પ્રાણાગ્નીસૂક્તવેદ્યો યઃ પવમાનો ગુણોજ્જ્વલઃ ।
તન્મધ્વદેવસેવોત્કઃ પાતુ શ્રીરઘુનન્દનઃ ॥ ૮॥

શ્રીમધ્વદેવસિદ્ધાન્તવિયદ્વિષ્ણુપદીધરમ્ ।
રઘુનન્દનતીર્થાર્યં પ્રણમામિ મુહુર્મુહુઃ ॥ ૯॥

“પરૈરપહૃતા મૂલરામાર્ચા ગુર્વનુગ્રહાત્ ।
યેનાનીતા નમસ્તસ્મૈ રઘુનન્દનભિક્ષવે” ॥ ૧૦॥

યો બ્રહ્મરુદ્રરવિન્દ્રશ્ચન્દ્રાદિનામધેશ્વરઃ ।
તન્મૂલરામસેવોત્કઃ પાતુ શ્રીરઘુનન્દનઃ ॥ ૧૧॥

પ્રાણેશં હનુમદ્ભીમમધ્વરૂપિણમન્વહમ્ ।
ધ્યાયં ધ્યાયં પુમાન્ પ્રાજ્ઞઃ પાતુ શ્રીરઘુનન્દનઃ ॥ ૧૨॥

શ્રીમદ્ભાગવતો યોસૌ જિતામિત્રકરોદ્ભવઃ ।
સ એવ પાતુ માં નિત્યં રઘુનન્દનમસ્કરી ॥ ૧૩॥

શ્રીમત્સુરેન્દ્રતીર્થાય યોદાત્ તુર્યાશ્રમં શુભમ્ ।
સ એવ પાતુ માં નિત્યં રઘુનન્દનમસ્કરી ॥ ૧૪॥

પદવાક્યપ્રમાણજ્ઞં વેદવેદાઙ્ગભાસ્કરમ્ ।
યતીન્દ્રં પુણ્યદં ધન્યં રઘુનન્દનમાશ્રયે ॥ ૧૫॥

પુરતો રાજતે યસ્ય શ્રીહનૂમાન્ ચતુર્ભુજઃ ।
સ એવ પ્રાણતત્વજ્ઞઃ પાતુ શ્રીરઘુનન્દનઃ ॥ ૧૬॥

વિષ્ણોઃસર્વોત્તમત્વં ચ સર્વદા પ્રતિપાદયન્ ।
યો રાજતે સ એવાસૌ પાતુ શ્રીરઘુનન્દનઃ ॥ ૧૭॥

“શઙ્ખચક્રગદાગ્રન્થધારી યઃ પ્રાણનાયકઃ” ।
પુરતો રાજતે યસ્ય સોવ્યાન્માં રઘુનન્દનઃ ॥ ૧૮॥

યસ્યાસ્થીનિ વિશુદ્ધાનિ શઙ્ખચક્રાઙ્કિતાનિ ચ ।
તં વન્દે વૈષ્ણવં ધન્યં રઘુનન્દનયોગિનમ્ ॥ ૧૯॥

દિવ્યં વૃન્દાવનં યસ્ય પમ્પાક્ષેત્રે વિરાજતે ।
સ એવ પાતુ માં નિત્યં રઘુનન્દનમસ્કરી ॥ ૨૦॥

સતાં કાર્યાણિ સિદ્ધ્યન્તિ યદ્વૃન્દાવનસેવયા ।
તં સેવે રુદ્રદેવાંશં રઘુનન્દનયોગિનમ્ ॥ ૨૧॥

રઘુનન્દનસ્તુતિં ભક્ત્યા યે પઠન્તિ દિને દિને ।
તેષુ શ્રીજાનકીજાનિઃ પ્રસન્નો ભવતિ ધ્રુવમ્ ॥ ૨૨॥

ઇતિ પ્રબન્ધપણ્ડિત આનન્દતીર્થશર્મા આચાર્યકૃતા
શ્રીરઘુનન્દનતીર્થસ્તુતિઃ સમ્પૂર્ણા ।
શ્રીકૃષ્ણાર્પણમસ્તુ ।

Encoded and proofread by Krishnananda Achar

*shrIraghunandanatIrthastutiH*

pdf was typeset on June 13, 2020

Please send corrections to *sanskrit@cheerful.com*